.. shrIrAmAShTottara shatanAmAvali ..

## ॥ श्रीरामाष्टोत्तर शतनामावलि ॥

ॐ श्रीरामाय नमः ।
ॐ रामभद्राय नमः ।
ॐ रामचंद्राय नमः ।
ॐ शाश्वताय नमः ।
ॐ राजीवलोचनाय नमः ।
ॐ श्रीमते नमः ।
ॐ राजेंद्राय नमः ।
ॐ रघुपुङ्गवाय नमः ।
ॐ जानकीवल्लभाय नमः ।
ॐ जैत्राय नमः ॥ १०॥
ॐ जितामित्राय नमः ।
ॐ जनार्दनाय नमः ।
ॐ विश्वामित्रप्रियाय नमः ।
ॐ दांताय नमः ।
ॐ शरणत्राणतत्पराय नमः ।
ॐ वालिप्रमथनाय नमः ।
ॐ वाग्मिने नमः ।
ॐ सत्यवाचे नमः ।
ॐ सत्यविक्रमाय नमः ।
ॐ सत्यव्रताय नमः ॥ २०॥
ॐ व्रतधराय नमः ।
ॐ सदाहनुमदाश्रिताय नमः ।
ॐ कौसलेयाय नमः ।
ॐ खरध्वंसिने नमः ।
ॐ विराधवधपंडिताय नमः ।
ॐ विभीषणपरित्रात्रे नमः ।
ॐ हरकोदण्डखण्डनाय नमः ।
ॐ सप्ततालप्रभेत्रे नमः ।
ॐ दशग्रीवशिरोहराय नमः ।
ॐ जामदग्न्यमहादर्पदलनाय नमः ॥ ३०॥
ॐ ताटकांतकाय नमः ।
ॐ वेदांतसाराय नमः ।

ॐ वेदात्मने नमः ।
ॐ भवरोगस्य भेषजाय नमः ।
ॐ दूषणत्रिशिरोहंत्रे नमः ।
ॐ त्रिमूर्तये नमः ।
ॐ त्रिगुणात्मकाय नमः ।
ॐ त्रिविक्रमाय नमः ।
ॐ त्रिलोकात्मने नमः ।
ॐ पुण्यचारित्रकीर्तनाय नमः ॥ ४०॥
ॐ त्रिलोकरक्षकाय नमः ।
ॐ धन्विने नमः ।
ॐ दंडकारण्यवर्तनाय नमः ।
ॐ अहल्याशापविमोचनाय नमः ।
ॐ पितृभक्ताय नमः ।
ॐ वरप्रदाय नमः ।
ॐ जितेंद्रियाय नमः ।
ॐ जितक्रोधाय नमः ।
ॐ जितमित्राय नमः ।
ॐ जगद्गुरवे नमः ॥ ५०॥
ॐ ऋक्षवानरसङ्घातिने नमः ।
ॐ चित्रकूटसमाश्रयाय नमः ।
ॐ जयंतत्राणवरदाय नमः ।
ॐ सुमित्रापुत्रसेविताय नमः ।
ॐ सर्वदेवादिदेवाय नमः ।
ॐ मृतवानरजीवनाय नमः ।
ॐ मायामारीचहंत्रे नमः ।
ॐ महादेवाय नमः ।
ॐ महाभुजाय नमः ।
ॐ सर्वदेवस्तुताय नमः ॥ ६०॥
ॐ सौम्याय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ मुनिसंस्तुताय नमः ।
ॐ महायोगिने नमः ।
ॐ महोदराय नमः ।
ॐ सुग्रीवेप्सितराज्यदाय नमः ।
ॐ सर्वपुण्याधिकफलाय नमः ।
ॐ स्मृतसर्वौघनाशनाय नमः ।

ॐ आदिपुरुषाय नमः ।
ॐ परमपुरुषाय नमः ॥७०॥
ॐ महापुरुषाय नमः ।
ॐ पुण्योदयाय नमः ।
ॐ दयासाराय नमः ।
ॐ पुराणपुरुषोत्तमाय नमः ।
ॐ स्मितवक्त्राय नमः ।
ॐ मितभाषिणे नमः ।
ॐ पूर्वभाषिणे नमः ।
ॐ राघवाय नमः ।
ॐ अनंतगुणगंभीराय नमः ।
ॐ धीरोदात्तगुणोत्तमाय नमः ॥८०॥
ॐ मायामानुषचारित्राय नमः ।
ॐ महादेवादिपूजिताय नमः ।
ॐ सेतुकृते नमः ।
ॐ जितवाराशये नमः ।
ॐ सर्वतीर्थमयाय नमः ।
ॐ हरये नमः ।
ॐ श्यामाङ्गाय नमः ।
ॐ सुंदराय नमः ।
ॐ शूराय नमः ।
ॐ पीतवाससे नमः ॥९०॥
ॐ धनुर्धराय नमः ।
ॐ सर्वयज्ञाधिपाय नमः ।
ॐ यज्विने नमः ।
ॐ जरामरणवर्जिताय नमः ।
ॐ शिवलिङ्गप्रतिष्ठात्रे नमः ।
ॐ सर्वापगुणवर्जिताय नमः ।
ॐ परमात्मने नमः ।
ॐ परब्रह्मणे नमः ।
ॐ सच्चिदानंदविग्रहाय नमः ।
ॐ परंज्योतिषे नमः ॥१००॥
ॐ परंधाम्ने नमः ।
ॐ पराकाशाय नमः ।
ॐ परात्पराय नमः ।
ॐ परेशाय नमः ।

ॐ पारगाय नमः ।
ॐ पाराय नमः ।
ॐ सर्वदेवात्मकाय नमः ।
ॐ परस्मै नमः ॥ १०८ ॥
इति श्रीरामाष्टोत्तरशतनामावलिस्समाप्ता ।

---

Please send corrections to sanskrit@cheerful.com
Last updated July 5, 2006